दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-107 | 1 | फरवरी 07, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणकृष्णषष्ठी
माघ 25 प्रविष्टांशः मङ्गलमयः भवेत्

2 यूनिसेफ (UNICEF) इत्यनेन अधिसूचितं यत् एआई (AI) द्वारा निर्मितं बालकानां अश्लीलचित्रणं 'बाल-यौन-शोषणम्' अस्ति
3 नाबार्ड-पक्षतः प्रदेशाय ७१३.८७ कोटिरूप्यकाणां ७३ योजनाः स्वीकृताः- मुख्यमन्त्री सुक्खुः
5 छिद्रघटस्य कथा (फूटे हुए घड़े की कहानी)

## आर.बी.आई इत्यनेन रेपो रेट इति सपादपञ्च-प्रतिशतमिति अपरिवर्तितमेव स्थापितम्

भारतीय रिजर्व बैंकः इत्यनेन रेपो दर प्रतिदानशुल्कप्रविधिः अपरिवर्तिता सपादपञ्चप्रतिशतात्मिका एव स्थापितास्ति। वर्तमानस्य वित्तीयवर्षस्य षष्ठस्य अन्तिमस्य च द्विमासिकस्य मौद्रिकनीतेः घोषणाम् कुर्वन् आर्. बी. आई. इत्यस्य प्रमुखः गवर्नर सञ्जय मल्होत्रा इत्युक्तवान् यत् मौद्रिकनीति-समित्या निर्णयोऽयं स्वीकृतः ।

## रशिया-अमरीका-देशौ च चतुर्थ्यः वर्षेभ्यः अनन्तरं उच्चस्तरीय-सैन्यसंवादाय पुनः सहमतौ

अमरीका-रशिया-देशौ चतुर्वर्षेभ्यः अधिककालानन्तरं प्रथमवारं उच्चस्तरीय-सैन्य-सम्वादं पुनः समारब्धुं सहमतौ अभवताम्। एकविंशत्यधिक-द्विसहस्रतमवर्षस्य अन्ते उच्चस्तरीयः सैन्य-सम्पर्कः स्थगितः आसीत्, यतः द्वाविंशत्यधिक-द्विसहस्रतम वर्षस्य फ़रवरी-मासे यूक्रेन देशे रशियादेशस्य व्यापक-आक्रमणात् पूर्वं मास्को-वाशिङ्गटनयोः मध्ये संघर्षात्मिका स्थितिः अत्यधिकतया वर्धिता आसीत्। ततः डोनाल्ड ट्रम्पः द्वितीय-कार्यकालाय प्रचारे अवदत् यत् सः शीघ्रमेव द्वन्द्वस्य समाप्तिं करिष्यतीति । शान्त्यर्थं तेन प्रस्तुताः बहवः प्रस्तावाः क्रेम्लिन्-पक्षाय अनुकूलाः आसन्, येषु यूक्रेन-देशस्य केचन प्रदेशाः रशिया-देशाय समर्पणीयाः स्युः इति प्रस्तावोऽपि अन्तर्भूतः आसीत्। यू.एस्. यूरोपियन कमान्ड् इत्यनेन प्रकाशिते वक्तव्ये उक्तं यत् "पुनः स्थापितः सम्प्रेषणमार्गः सैन्येन सह निरन्तरं सम्पर्कं स्थापयिष्यति, यतः उभयपक्षौ दीर्घकालीन शान्त्यर्थं सततं प्रयत्नं करिष्यतः।

## पाकिस्ताने शिया-धार्मिककेन्द्रे आत्मघातिनः आक्रमणेन एकत्रिंशज्जनाः मृताः



पाकिस्तान्-देशस्य राजधान्यां इस्लामाबाद-नगरस्य शिया-धार्मिककेन्द्रे आत्मघातिनः आक्रमणेन एकत्रिंशज्जनाः मृताः, सप्तत्युत्तरैकशतं जनाश्च व्रणिताः सन्ति। आरक्षकाः आपदुद्धारदलञ्च स्थले आगत्य उद्धारकार्यम् आरब्धवन्तः ।

## प्रधानमन्त्रिणा नरेन्द्रमोदिना लोकप्रियस्य मनोरञ्जककार्यक्रमस्य परीक्षा पे चर्चा इत्यस्य नवमे संस्करणे छात्रैः सह संवादः कृतः



प्रधानमन्त्रिणा नरेन्द्रमोदिना लोकप्रियस्य मनोरञ्जककार्यक्रमस्य परीक्षा पे चर्चा इत्यस्य नवमे संस्करणे छात्रैः सह संवादः कृतः। प्रधानमन्त्री छात्रान् परीक्षाकाले चिन्तायाः निवारणं कथं करणीयमिति विषये सम्बोधितवान् । संवादस्य परिसमाप्तिं कुर्वन्, श्रीमोदी छात्रान् स्वकीयाः विशिष्टाः शिक्षणपद्धतयः विश्वसन्तु इति उपादिशत्। सः अवदत् यत् प्रत्येकस्य छात्रस्य विशिष्टा शैली भवति, स्वीयप्रस्तुत-पद्धत्यां पूर्णविश्वासश्च महत्त्वपूर्णः अस्ति । प्रधानमन्त्रिणा उक्तं यत् शिक्षकाः प्रत्येकस्य छात्रस्य अध्ययनगतिं प्रति संवेदनशीलाः भवेयुः । सवाबत् वेङ्कटेश नामकः एकः छात्रः श्रीमोदिनं पृष्टवान् यत् अङ्कानाम् अपेक्षया कौशलं महत्त्वपूर्णं भवति नवेति? प्रधानमन्त्री निष्कर्षयन् अकथयत् यत् वास्तविकः आत्मविश्वासः स्वयमेव सत्येन युतं भवति ।

## विभिन्नेषु विषयेषु विपक्षस्य विरोधात् लोकसभायाः कार्यम् एकदिवसाय स्थगितम्



भारत-अमरीका-व्यापार-व्यवहारेण सह विभिन्नेषु विषयेषु विपक्षस्य विरोधात् लोकसभायाः कार्यम् एकदिवसाय स्थगितम् । द्वादश-वादने प्रथमस्थगनानन्तरं यदा सभा सम्मिलिता तदा काङ्ग्रेस-दलस्य, टी. एम्. सी. दलस्य, डी. एम. के. दलस्य च विपक्षिणः संसदसदस्याः पुनः सभामध्यमागत्य सर्वकारं विरुध्य विरोधघोषं घोषितवन्तः। पीठासीन अधिकारिणा सदस्याः सभायाः कार्यस्य अनुमत्यै निवेदिताः। विपक्षस्य मध्यकोलाहले मन्त्रिभिः स्वस्व-मन्त्रालयाणां पत्राणि स्थापितानि । अध्यक्षेण पौनः पुन्येन आवाहिते सत्यपि विपक्षस्य सदस्याः स्वविरोधं अन्ववर्तन्त, तदनन्तरं सभा दिनपर्यन्ताय स्थगिता। केन्द्रीय-आयव्ययसत्रस्य चर्चायां निरन्तर विरोधत्वात् चर्चा अशक्याऽसीत्। तत्पूर्वं, यदा लोकसभायाः दिनस्य अधिवेशनं जातम्, तदा लोकसभायाः अध्यक्षः ओम बिरला-वर्यः प्रश्नोत्तरकालं स्वीकर्तुं प्रायतत, तथापि विपक्षस्य सदस्याः मध्यसभामागत्य कोलाहलं-कर्तुम् आरभन्त। श्री बिरलावर्यः विपक्षस्य सदस्यानां व्यवहारस्य विषये चिन्तां प्रकटितवान् सभायाश्च कार्याय अनुमतिं दातुं तान् आवाहयत्। सः अवदत् यत्, संसदः आयव्यय-सत्रस्य समये सभायां व्यवधानेन सभायाः एकोनविंशति होरातोधिकः कालः व्यर्थः अभवत् । लोकसभायाः अध्यक्षः सदस्यान् सभायाः गौरवम्, मर्यादाञ्च रक्षयितुं उद्बुद्धवान्। सः अवदत् यत्, देशस्य जनाः सभायाम् अर्थपूर्ण-चर्चायै सदस्यान् निर्वाचयन्ति परन्तु विपक्षस्य सदस्याः कोलाहलं कृत्वा, फलकानि दर्शयित्वा च सभां व्याकुली कुर्वन्ती ।

## जम्मू-कश्मीरम्: केन्द्रीय-गृहमन्त्री अमितशाहः हीरानगर-क्षेत्रे अग्रिम-सीमायाः भ्रमणेन सह यात्रां प्रारब्धवान्

केन्द्रीय-गृहमन्त्री अमितशाहः गतशुक्रवासरे जम्मू-कश्मीरस्य स्वकीय-द्विदिवसीय-प्रवासस्य आरम्भं कठुआ-मण्डले अन्तर्राष्ट्रिय-सीमायाः समीपे हीरानगर-क्षेत्रे अग्रिम-भागानां पर्यटनेन सह अकरोत्। गृहमन्त्री सीमा-सुरक्षा-बलस्य (BSF) भटानां कृते कल्याणकारी-योजनानां शुभारम्भं कृतवान्। श्रीशाहः हीरानगर-क्षेत्रे गुरनाम-बोबियान-सीमारक्षा-चौकीनां (border outposts) निरीक्षणं कृतवान्। सः घुसपैठ-रोधनार्थं सीमा-सुरक्षा-बलेन कृतानां प्रबन्धानाम् अवलोकनम् अकरोत्।

## सुभाषितम्

**न हि वैरेण वैराणि,**
**शाम्यन्तीह कदाचन।**
**अवैरेण हि शाम्यन्ति,**
**एष धर्मः सनातनः।।**

भावार्थः- इस संसार में वैर का प्रतिकार वैर से ही करने से वैर का अन्त कभी भी नहीं होता है। उसका अन्त तो केवल वैर न कर सद्भावपूर्ण व्यवहार से ही संभव है, ऐसा सनातन धर्म का निर्देश है।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## सप्तचत्वारिंशत् लक्षाधिक-अष्ट-कोटिः कृषकाणां किसान-परिचयपत्राणि निर्गतानि सन्ति



राज्यसभायां प्रश्नकाले केन्द्रीय-कृषि-मन्त्री शिवराज सिंह चौहानः अवदत् यत् साम्प्रतं यावत् सप्तचत्वारिंशत् लक्षाधिक-अष्ट-कोटिः कृषकाणां किसान-परिचयपत्राणि निर्गतानि सन्ति। सर्वकारः षड्विंशति द्विसहस्रवर्षतःसप्तविंशत्यधिक द्विसहस्र वर्षपर्यन्तं देशे एकादश-कोटि-कृषकेभ्यः किसान-परिचयपत्र-दानस्य लक्ष्यं निर्धारितवान्। सः अवदत् यत् वर्तमानकाले नवदश-राज्येषु किसान-परिचयपत्राणि निर्मीयन्ते नवतिलक्षोत्तर-द्विकोटिः कृषकाश्च नेशनल-क्रॉप-इंश्योरेंस पोर्टल इत्यनेन सह संयोजिताः सन्ति

# बेटी बचाओ बेटी पढ़ाओ योजना इदानीं 'राष्ट्रीय-आन्दोलनम्' अभवत्: अन्नपूर्णा देवी




सर्वकारेण घोषितं यत् 'बेटी बचाओ बेटी पढ़ाओ' योजना एका नीतिगत-पहलतः राष्ट्रियान्दोलने परिवर्तिता अस्ति। अस्यां योजनायां सर्वकारीयाभिकरणानि, समुदायाः, सञ्चारमाध्यमाः, नागरिकसमाजः तथा सामान्यजनाः इत्यादयः विविधाः हितधारकाः सम्मिलिताः सन्ति। लोकसभायां लिखितोत्तरे महिला-बालविकासमन्त्री अन्नपूर्णा देवी अवदत् यत् राष्ट्रियस्तरे 'जन्मसमये लिङ्गानुपातः' (SRB) २०१४-१५ वर्षे ९१८ तः वर्धित्वा २०२४-२५ वर्षे ९२९ अभवत्। माध्यमिकस्तरे विद्यालयेषु बालिकानां 'सकल-नामाङ्कन-अनुपातः' (GER) अपि २०१४-१५ वर्षे ७५.५१% तः वर्धित्वा २०२४-२५ वर्षे ८०.२% जातः। सा सूचितवती यत् स्वास्थ्य-परिवारकल्याण-मन्त्रालयस्य २०२०-२१ 'HMIS' अङ्कानाम् आधारेण जनपदेभ्यः लिङ्गानुपातस्य स्थित्यनुसारं धनं प्रदीयते। श्रीमती अन्नपूर्णा देवी उक्तवती यत् बालिकानां लिङ्गानुपातस्य तथा जीवनचक्रे तासां सक्षमीकरणस्य विषयाणां समाधानार्थं २२ जनवरी २०१५ तमे वर्षे एषा योजना प्रारब्धा। अस्याः उद्देश्यं न केवलं लिङ्गभेदस्य निवारणं, अपितु बालिकाभ्यः महत्त्वं प्रदातुं सांस्कृतिक-परिवर्तनस्य प्रोत्साहनम् अपि अस्ति।

# यूनिसेफ (UNICEF) इत्यनेन अधिसूचितं यत् एआई (AI) द्वारा निर्मितं बालकानां अश्लीलचित्रणं 'बाल-यौन-शोषणम्' अस्ति

संयुक्तराष्ट्रसङ्घस्य संस्था यूनिसेफ (UNICEF) अवदत् यत् कृत्रिममेधया (Artificial Intelligence - AI) निर्मितं बालकानां अश्लीलचित्रणं बाल-यौन-शोषणस्य एकः प्रकारः अस्ति, अतः एतत् अपराधत्वेन मन्तव्यम्। यूनिसेफ-संस्थया एआई-उपकरणैः आपत्तिजनक-सामग्र्याः निर्माणस्य वर्धमानप्रवृत्तौ सचेतना दत्ता। संस्थया उक्तं यत् एआई-माध्यमेन सज्जिता एतादृशी सामग्री विश्वे चिन्तायाः विषयः अस्ति। एतादृशाः अपि विषयाः आगताः यत्र बालकानां वास्तविकचित्रेषु 'डीपफेक' (Deepfake) तन्त्रज्ञानस्य प्रयोगं कृत्वा तेषां विकृत-अश्लील-रुपं प्रदर्श्यते। यूनिसेफ इत्यस्य कथनं अस्ति यत् अस्य तन्त्रज्ञानस्य साहाय्येन बालकानां नग्नचित्राणि प्रदर्श्यन्ते। संयुक्तराष्ट्रसंस्थया विश्वस्य सर्वकारेभ्यः अनुरोधः कृतः यत् ते स्वाधिनियमेषु 'बाल-यौन-शोषणस्य' परिभाषायाः विस्तारं कुर्वन्तु। अस्मिन् एआई-निर्मितसामग्र्याः निर्माणं, क्रयणं, वितरणं च अपराधिकप्रक्रिया इति घोषणीया। यूनिसेफ-संस्थया एआई-विकासक-संस्थाः अपि उक्ताः यत् ताः एतादृशसामग्र्याः प्रसारं रोद्धुं कठोरसुरक्षामापदण्डान् स्वीकुर्वन्तु।

# हिमाचलप्रदेशस्य भाजपा-विधायकदलं राज्यपालाय ज्ञापनं समर्प्य तीव्रं विरोधं प्रकटितवान्; कांग्रेससर्वकारे एते आरोपाः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे नेता-प्रतिपक्षस्य जयरामठाकुरस्य नेतृत्वे भाजपा-विधायकदलं प्रदेशस्य राज्यपालं शिवप्रतापशुक्लं समभिगम्य प्रदेशीय-कांग्रेस- सर्वकारस्य विरुद्धं विस्तृतं ज्ञापनं समर्पितवान्। ज्ञापनस्य माध्यमेन विधायकक्षेत्र- विकासनिधेः, ऐच्छिकनिधेः, विपक्षीयविधायकानां विकासप्राथमिकतानां विलम्बनविषयः गम्भीरतया उद्घाटितः। ज्ञापने राज्यपालाय निवेदितं यत् अक्तूबर २०२५तः परं प्रदेशसर्वकारः विधायकक्षेत्र- विकासनिधिः न विमोच्यते; तस्मात् विधायकेभ्यः स्व-स्व विधानसभाक्षेत्रेषु जनतायै कृतानां विकासप्रतिज्ञानां पूर्तौ महती कठिनता जायते। भाजपाविधायकदलम् अवदत् यत् अस्मिन् वर्षे प्राकृतिक-आपदया प्रदेशे महती क्षतिः अभवत्, तादृशे काले विधायकनिधिः विकास- पुनर्स्थापन- कार्येषु च अत्यावश्यकी आसीत्; तथापि बजट- प्रावधानस्य सत्त्वेऽपि सर्वकारः केवलं अर्ध-निधिः विमोचिता, अवशिष्टा राशि निरुद्धा।ज्ञापने अपि उक्तं यत् विधायकेषां ऐच्छिक-निधिः समये न विमोच्यते; तेन दरिद्राणां, रोगग्रस्तानां तथा आपदाप्रभावितानां जनानां प्रति त्वरितसहायायां बाधा जायते। अनेन जनप्रतिनिधीनां विश्वसनीयता अपि प्रभावितेति निर्दिष्टम्। ज्ञापन-समर्पणानन्तरं नेता-प्रतिपक्षः जयरामठाकुरः अवदत् यत् हिमाचले परम्परा अस्ति- विधायकेभ्यः विकास-दृष्ट्या प्राथमिकताः गृहीत्वा ते पीडब्ल्यूडी तथा जल-शक्ति-विभागयोः स्वयोजनाः पञ्जीकुर्वन्ति। किन्तु गतत्रिवर्षेषु विपक्षीय-विधायकेन प्रदत्तासु प्राथमिकतासु न डीपीआर् (Detailed Project Report) निर्मीयते, न च ताः नाबार्ड-स्वीकृत्यर्थं प्रेष्यन्ते। यत्र क्वचित् डीपीआर निर्मिता अपि, तत्रापि अग्रे न नीयते, अपि तु निरुद्धा भवति।सः अवदत् यत् एषा स्थितिः लोकतान्त्रिक-व्यवस्थायाः, समान-विकास-भावनायाः प्रतिकूला अस्ति। विपक्षीयक्षेत्रेषु विकासकार्याणि योजनाबद्धतया अवरुद्धानि भवन्ति। विधायकनिधेः केवलं द्वे अंशे- ५५-५५ लक्ष-रूप्यकाणि एव विमोचिते, शेषा राशि निरुद्धा। अनेकेषु प्रकरणेषु स्वीकृति-पत्रस्य निर्गमनानन्तरमपि कोषागार-स्तरे देयं निरुद्धम्।जयरामठाकुरः अवदत् यत् भाजपा-विधायकदलः राज्यपालं विनीततया अनुरोधितवान् यत् सरकाराय निर्देशाः दातव्याः यत् विधायकक्षेत्र- विकासनिधिः, ऐच्छिकनिधिः शीघ्रं विमोच्यताम्, विपक्षीय-विधायकानां विकास-प्राथमिकतानां डीपीआर निर्मीयताम् च नाबार्ड-प्रेष्यताम्, येन सर्वेषु क्षेत्रेषु सन्तुलितः विकासः सुनिश्चितो भवेत्।अस्मिन् अवसरे नेता-प्रतिपक्षस्य सह विधायकाः विपिन परमारः, सतपाल सत्ती, विक्रमठाकुरः, रणधीर शर्मा, डी. एस. ठाकुरः, राकेश चौहानः, पवन काजलः, सुखराम चौधरीः, दिलीप ठाकुरः, इन्द्रसिंह गान्धी, डॉ. जनकराजः, दीपराज कपूरः, लोकेन्द्र कुमारः, प्रकाश राणा, रीना कश्यपः, त्रिलोक जमवालः, इन्द्रदत्त लखनपालः, सुरेन्द्र शौरीः, पूर्णचन्द्रः, जीतराम कटवालः, हंसराजः, बलबीर वर्मा इत्यादयः अन्ये च विधायकाः उपस्थिताः आसन्।

# देशस्य भविष्यं तदा एव सुरक्षितं भवति यदा तस्य युवा पीढी तस्य अतीतं अवगच्छति




रक्षामन्त्री राजनाथसिंहः अवदत् यत् तावत् कोऽपि देशः पूर्णतया सुरक्षितः इति न गणयितुं शक्यते यावत् तस्य सांस्कृतिकमूलाधाराः, मूल्यानि, परिचयः च न रक्षिता। रक्षामन्त्री उत्तराखण्डस्य हरिद्वारनगरे स्वामी सत्यमित्रानन्दगिरीजीमहाराजस्य प्रतिमायाः अभिषेकस्थापनसमारोहं सम्बोधयन् एतत् वक्तव्यं दत्तवान्। सः अवदत् यत् राष्ट्रियसुरक्षायाः अर्थः केवलं भौगोलिकसीमानां रक्षणं न भवति, अपितु सांस्कृतिकपरिचयस्य, सभ्यचेतनायाः च रक्षणम् अपि भवति। युवानां भूमिकायाः विषये रक्षामन्त्री अवदत् यत् कस्यचित् देशस्य भविष्यं तदा एव सुरक्षितं भवति यदा तस्य युवा पीढी तस्य अतीतं अवगच्छति, तस्य आदर्शमूल्यानि स्वीकरोति, तेभ्यः प्रेरिता अग्रे गच्छति च। सः अवदत् यत् यदा नैतिकमूल्यानि प्रौद्योगिकीज्ञानेन सह संयोज्यन्ते तदा कोऽपि बलं देशं दुर्बलं कर्तुं न शक्नोति।

# विदेशराज्यमन्त्री पबित्रा मार्गेरिटा जापानदेशस्य गुन्मा-प्रान्तस्य राज्यपालेन इचिता यामामोटो-महोदयेन सह मिलितवान्




विदेशराज्यमन्त्री पबित्रा मार्गेरिटा जापानदेशस्य गुन्मा-प्रान्तस्य राज्यपालेन इचिता यामामोटो-महोदयेन सह मेलनम् अकरोत्। सामाजिक-माध्यम-सन्देशे (Social media post) श्री मार्गेरिटा उक्तवान् यत् भारत-जापानयोः मध्ये राज्य-प्रान्तीय-सहयोगः 'विशिष्ट-रणनीतिक-वैश्विक-साझेदारी' इत्यस्य एकः प्रमुखः स्तम्भः अस्ति। सः सूचितवान् यत् गुन्मा-प्रान्तस्य राज्यपालः जापानी-व्यवसायिनां कोषाध्यक्षाणां (banks) च एकेन प्रतिनिधिमण्डलेन सह भारतस्य प्रवास्ये अस्ति। श्री मार्गेरिटा विनिर्माण-तन्त्रज्ञान-गतिशीलता-लघु-मध्यम-उद्यम-स्टार्टअप-आगामि-सन्तति-आधारभूत-संरचना (Next-gen infrastructure) इत्यादिषु क्षेत्रेषु सहयोगं सुदृढं कर्तुं बलं दत्तवान्।

# नाबार्ड-पक्षतः प्रदेशाय ७१३.८७ कोटिरूप्यकाणां ७३ योजनाः स्वीकृताः- मुख्यमन्त्री सुक्खुः



हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः २०२६-२७ वित्तवर्षस्य विधायक-प्राथमिकतानां सम्पादनार्थं ऊना, हमीरपुर, सिरमौरः च जनपदानां विधायकाणां उपवेशनस्य अध्यक्षतां कृतवान्। सः अवदत् यत् २०२५-२६ वर्षस्य कृते नाबार्ड (NABARD) इत्यस्मात् ७१३.८७ कोटिरूप्यकाणां ७३ योजनाः सर्वकारेण स्वीकृताः कृताः।

## योजनानां वितरणम्-

१. लोकनिर्माणविभागः (PWD):- ५१२.३१ कोटिरूप्यकाणां ५५ योजनाः।

२. जलशक्तिविभागः- २०१.५६ कोटिरूप्यकाणां १८ योजनाः।

मुख्यमन्त्रिणा आदिष्टं यत् बजटराशेः पूर्ण-उपयोगः भवेत्, प्रतिपूर्ति-अधिकारे (Reimbursement claims) १५ मार्च २०२६ दिनाङ्कात् पूर्वं समर्पणीयाः।

### राजस्व-हानि-अनुदानम् (RDG) अन्यायश्च:

मुख्यमन्त्री अवदत् यत् १६-तमे वित्त-आयोगेन अनुच्छेद २७५(१) अन्तर्गतं लभ्यमानं राजस्व- हानि- अनुदानं स्थगितं कृत्वा पर्वतीयराज्यानां कृते अन्यायः कृतः। १९५२ तः लभ्यमानं एतत् अनुदानं स्थगितं कृत्वा हिमाचलस्य ५०,००० कोटिरूप्यकाणां हानिः भविष्यति। हिमाचलः वृक्षाणां कर्तने प्रतिबन्धं संस्थाप्य देशस्य पर्यावरणरक्षणं करोति तथा च नदीनां जलं ददाति, अतः एतादृशः दण्डः अनुचितः अस्ति।

### विधायकाणां प्रमुखाः अभ्यर्थनाः धन्यवादाश्चः

विधायकः क्षेत्रम् प्रमुखाः विषयाः / अभ्यर्थनाः

सुदर्शन बबलू चिंतपूर्णी मन्दिर-विस्ताराय १३० कोटि-रूप्यकाणां कृते धन्यवादः, जोल-क्षेत्रे उप-अग्निशमनकेन्द्रस्य' अभ्यर्थना।

राकेश कालिया गगरेटम् चिकित्सालय- निर्माणाय राशि-आग्रहः, सीवरेज-सुविधा तथा जलोप्लव-रक्षणम् (Flood Protection)।

सतपाल सत्ती ऊना नगरनिगमे सम्मिलितानां नूतन-ग्रामाणां कृते सीवरेज-योजना, ड्रेनेज-व्यवस्थायाः सुदृढीकरणम्।

विवेकशर्मा। कुटलैहड़म् जलशक्ति-योजनाभ्यः ३६.८९ कोटि-रूप्यकाणां कृते धन्यवादः, बङ्गाणा-क्षेत्रे उप-न्यायाधीश-न्यायालयस्य अभ्यर्थना।

सुरेशकुमारः भोरंजम् क्रिटिकल- केयर- यूनिट (₹23.75 Cr) इत्यस्य कृते धन्यवादः, नगरपञ्चायते आधारभूत- संरचनायाः सुदृढीकरणम्।

रणजीतसिंहः सुजानपुरम् बीडीओ- कार्यालय- निर्माणम्, चिकित्सालयेषु रिक्त-चिकित्सक-पदानां पूर्तिः।इन्द्रदत्तलखनपालः बड़सरः बड़सर-भोटा क्षेत्रयोः नूतन-बस-स्थानकम्, एम्स-बस-सेवा (AIIMS Bus)।

रीनाकश्यप पच्छाद हाब्बन- घाटी- भूरेश्वर- महादेव- मन्दिरेषु पर्यटनविकासः।

अजयसोलंकी नाहनम् नाहन- चिकित्सा- महाविद्यालये 'कॉर्डियोलोजी' विभागः, विद्युत्-न्यूनतायाः (Low Voltage) निवारणम्।

विनयकुमारः श्रीरेणुकाजी रेणुका-सरोवरस्य उद्धारः (Desilting), 'रेणुका-मृगविहारे' सिंहानां आनयनम्।

सुखरामचौधरी पांवटासाहिबम् हिमाचल- उत्तराखण्ड- संयोजकस्य 'नावघाट' सेतोः निर्माणं, गिरि-सिंचाई-नहराणां परिष्कारः।

अस्मिन् अवसरे उपमुख्यमन्त्री मुकेश अग्निहोत्री, उद्योगमन्त्री हर्षवर्धनचौहानः, मुख्यसचिवः सञ्जय गुप्ता तथा अन्ये वरिष्ठाधिकारिणः उपस्थिताः आसन्। मुख्यमन्त्री स्पष्टीकृतवान् यत् सर्वकारः राज्यस्य अर्थव्यवस्थां सुदृढां कर्तुं आत्मनिर्भरं च निर्मातुं वचनबद्धः अस्ति।

# 'राजस्व-हानि-अनुदानस्य स्थगनं पर्वतीयराज्यानां कृते घातकम्'; मुख्यमन्त्री सुक्खू महोदयः केन्द्रात् 'विशेष-आर्थिक- संकुलस्य' अभ्यर्थनां कृतवान्

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः १६-तमेन वित्त-आयोगेन राजस्व- हानि- अनुदानस्य (Revenue Deficit Grant) स्थगनं पर्वतीयराज्यानां कृते विनाशकारी इति वर्णितवान्। सः अवदत् यत् अनेन हिमाचलस्य ५० सहस्रकोटिरूप्यकाणां हानिः भविष्यति, एषः निर्णयः 'सहकारी-सङ्घवादस्य' (Cooperative Federalism) भावनायाः विरुद्धम् अस्ति।मुख्यमन्त्री उक्तवान् यत् राजस्व-हानि-अनुदानं १९५२ तः १५-तम-वित्त-आयोगपर्यन्तं राज्यानां वित्तीय-स्थिरतायै निरन्तरं लभ्यते स्म। १६-तमे वित्त-आयोगेन प्रथमवारं एतत् स्थगितम्, यत् हिमाचलसदृश-कठिनभौगोलिक- परिस्थितियुक्तानां राज्यानां कृते घोर-अन्यायः अस्ति।

## ५० सहस्रकोटिरूप्यकाणां वित्तीय-हानिः

१५-तमे वित्त-आयोगे हिमाचलस्य कृते ३७,१९९ कोटिरूप्यकाणां अनुदानस्य संस्तुतिः कृता आसीत्। कोरोनाकाले अपि पूर्वतन- भाजपासर्वकाराय ११,४३१ कोटिरूप्यकाणां साहाय्यं प्राप्तम् आसीत्। अनुदानस्य पूर्णतः स्थगनेन राज्यस्य अर्थव्यवस्थायां प्रायः ५०,००० कोटिरूप्यकाणां विशालः भारः आगमिष्यति।

## कठोर-निर्णयाः केन्द्रीय-बजटस्य उपेक्षा च

मुख्यमन्त्री अवदत् यत् इदानीं राज्यस्य आयं वर्धयितुं कुशल-वित्तीयप्रबन्धनाय च कठोरनिर्णयाः स्वीकरणीयाः भविष्यन्ति। सः केन्द्रीय-बजटस्य आलोचनां कुर्वन् अवदत् यत् हिमाचलस्य अर्थव्यवस्थायाः आधारः कृषिः अस्ति, परन्तु केन्द्रीय-बजट-मध्ये कृषकेभ्यः न किमपि 'उपदानम्' (Subsidies) नापि आधारभूत- संरचनायै किमपि प्रावधानं कृतम्। भानुपल्ली- बिलासपुर- चण्डीगढ़- बद्दी रेलमार्ग- विस्ताराय अपि कोऽपि दृढ़निर्णयः न दृश्यते।

# चम्बा-जनपदस्य भरमौरक्षेत्रे ७०० वर्ष- पुरातनं गिरड़-मातामन्दिरं भस्मीभूतम्; प्रतिमानामपि क्षतिः

हिमसंस्कृतवार्ताः- चम्बा।हिमाचलप्रदेशस्य चम्बा-जनपदस्य भरमौर- विधानसभा- क्षेत्रान्तर्गतस्य खुन्देल- ग्रामपञ्चायतस्य गिरड़क्षेत्रे एकस्याः शिलायाः उपरि निर्मितं ७०० वर्ष-पुरातनं गिरड़-मातामन्दिरम् अग्निकाण्डे नष्टं जातम्। एषा घटना शुक्रवासरे अपराह्णे प्रायः ३:३० वादने अभवत्। मन्दिरस्य गर्भगृहे हठात् समुत्थिताभिः अग्निज्वालाभिः पश्यतामेव पूर्णं मन्दिरं भस्मीभूतं जातम्।

**हानिः कारणानि च**

१. प्रतिमा-क्षतिः- मन्दिरस्य अन्तः स्थितानां सङ्गमरमर- कृष्णाशिला- पीतल- निर्मितानां प्रतिमानामपि क्षतिः जाता अस्ति।

२. काष्ठकलायाः विनाशः- देवदारु-काष्ठैः निर्मितं सुन्दरं काष्ठकलायुक्तं मन्दिरं दग्धं जातम्, येन लक्षशः रूप्यकाणां हानिः अभवत्।

३. अग्नि-कारणम्:- प्राथमिक-अनुमानस्य अनुसारं विद्युत्-लघुपथेन (Short Circuit) एषा अग्निः लग्ना भवेत्।

खुन्देल-पञ्चायत-प्रधानः रत्नठाकुरः अवदत् यत् मन्दिरस्य द्वाराणि शीतकालस्य कारणेन (दिसम्बरतः १३ अप्रैल पर्यन्तम्) बद्धानि आसन्।

## श्रद्धायाः केन्द्रम्

गिरड़-माता-मन्दिरं स्थानीय-गद्दी-जनजातेः अन्येषां च श्रद्धायाः प्रमुखं केन्द्रम् अस्ति। चम्बाजनपदस्य अन्यानां प्राचीन-मन्दिराणां सदृशं एतन्मन्दिरमपि क्षेत्रस्य समृद्ध- सांस्कृतिक- विरासतस्य एकः भागः आसीत्। हिमाचल- संवर्गस्य वरिष्ठ-आईएएस-अधिकारी (IAS Officer) ओङ्कार चन्द शर्मा तस्य परिवारः च अस्याः मातुः परमभक्ताः सन्ति। भरमौरस्य विधायकः डॉ. जनकराजः तथा विपणन- समिति-अध्यक्षः ललित ठाकुरः च अस्याः घटनायाः उपरि दुःखं प्रकटितवन्तौ, प्रशासनात् च हानेः उचितं मूल्याङ्कनं कृत्वा पुनरुद्धाराय पदक्षेपं स्वीकर्तुं आग्रहं कृतवन्तौ।

# दारचा-शिंकुला मार्गः पुनरारब्धः; हिमाचल-लद्दाखयोः सम्पर्कः पुनर्स्थापितः

हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।

हिमाचलप्रदेशस्य लाहौलक्षेत्रात् जांस्कर-कारगिलमार्गेण लद्दाखपर्यन्तं गच्छन् दारचा- शिंकुला मार्गः पुनरारब्धः अभवत्। प्रायः द्विसप्ताहपूर्वं जातस्य अत्यधिक-हिमपातस्य (Heavy Snowfall) कारणेन अयं मार्गः अवरुद्धः आसीत्, येन यातायातं प्रभावितं जातम। यद्यपि शिंकुला-दर्रा (Shinku La Pass) इत्यत्र इदानीमपि पञ्चतः अष्ट-पाद-पर्यन्तं (5-8 feet) हिमम् अस्ति, अतः अधुना केवलं 'फोर-बाई-फोर' (4x4) वाहनानां गमनाय अनुमतिः दत्ता अस्ति।

## प्रशासनस्य सज्जता

सीमा-मार्ग-सङ्घटनम् (BRO): बीआरओ-पक्षतः मार्गस्य परिष्काराय हिम-निवारणाय च निरन्तरं कार्यं क्रियते। लाहौल-स्पीति जनपदस्य उपायुक्ता किरण भड़ाना अवदत् यत् यदि ऋतुः अनुकूलः भविष्यति, तर्हि आगामि-दिनेषु पर्यटकानां कृते अपि अयं मार्गः उद्घाटयिष्यते। प्रशासनं स्थितेः उपरि निरन्तरं दृष्टिं स्थापयति। शेषं पञ्चमे पृष्ठे...

# यातायातमार्गसुरक्षा, शिरासु संवेदना, कोटद्वारपरिवहनविभागेन आधारशिला-समूहेन च सेवायाः नवकार्यं समायोजितम्




**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला**, कोटद्वारम्।यातायातमार्ग-सुरक्षा-जीवन-रक्षा-मासस्य अवसरं दृष्ट्वा कोटद्वार-परिवहनविभागस्य तत्त्वावधानेन आधारशिला- रक्तदानसमूह- कोटद्वारेण प्रकाश- नेत्रपरीक्षणकेन्द्रेण संयुक्तरूपेण रक्तदानशिविरं निःशुल्क-नेत्रपरीक्षण-शिविरं च आयोजितम्।

अद्यतनं दिनं केवलं पञ्चाङ्गस्य एका तिथि न, अपि तु कोटद्वारनगरे 'संवेदनाया उत्सवः' इव अभवत्। यत्र सामान्यतः परिवहन-विभागस्य कार्यालयात् दण्डादेशध्वनिः श्रूयते, तत्र अद्य "रक्तदानं महादानम्" इति संकल्पनिनादेन दिनं सेवामयं जातम्। यातायातमार्ग-सुरक्षा-सप्ताहस्य अन्तर्गतं नियमपालनस्य उपदेशः प्रदीयते; तदेव अद्य सेवाया महापर्वरूपेण रक्तदान-शिविरस्य आयोजनं सिद्ध्यति। प्रशासनस्य हस्ते केवलम् अधिकाराः न सन्ति, अपि तु करुणया धड़कमानं हृदयं अपि अस्ति।

## इतिहासं रचयन्ती एका दृष्टान्त-घटना

यदा अधिकारी दिवसेन यातायातमार्ग-सुरक्षां सुनिश्चितं कर्तुं दृढनिर्णयान् गृह्णाति, स एव अधिकारी शान्तभावेन रक्तदान-आसन्दे उपविश्य स्व-शिरासु प्रवहमानं रक्तं समाजाय अर्पयति, तदा स दृश्यं 'आदर्शः' भवति। सहायक- सम्भागीय- परिवहन- अधिकारिणा (प्रवर्तनतः) श्रीमती शशिदुबेमहाभागया स्वजीवनस्य प्रथमं रक्तदानं कृत्वा एतत् प्रतिपादितवती । समाज-परिवर्तनाय भाषणं न, आचरणमेव आवश्यकम्। तस्य प्रथम- रक्तबिन्दुः सहस्राणां यूनां कृते 'प्रेरणाया बीजम्' इव भविष्यति, रक्तदानविषये जनान् प्रेरयिष्यति। अद्य कोटद्वार-परिवहनविभागेन वर्धिता गरिमा नवोन्नतिं प्राप्तवती। यत्र केवलं व्यवस्थापकः न, अपि तु 'जीवनदाता' इति भूमिकायां दृश्यते।"यातायातमार्ग-सुरक्षा प्रसृतं रक्तं शापः, दत्तं रक्तं तु आशीर्वादः।" रक्तदानशिविरेण सह निःशुल्क- नेत्रपरीक्षण- शिविरमपि आयोजितम्। अत्र प्रकाश- नेत्रसुरक्षकेन सतीश-अमोलीमहाभागेन सेवया एषः सन्देशः दत्तः। सुरक्षित-यात्रायै केवलं वाहनस्य यन्त्राणि सम्यक् स्युः इति न पर्याप्तम्, चालकस्य दृष्टिरपि निर्मला भवेत्। अद्यतनशिविरे ३५ जनानां नेत्र-परीक्षा कृता, २७ पञ्जीकरणानि अभवन्, तथा २३ रक्तदातृभिः रक्तदानं कृतम्। आधारशिला-रक्तदान-समूहस्य प्रमुख-सेवकः दलजीत-सिंहः महाभागः तथा संरक्षकः श्री गिरिराज-सिंहः महाभागः च स्वपरिश्रमेण २३ नायकेभ्यः अवसरं दत्तवन्तौ—ये निरपेक्षतया, निरनाम्ना, स्व-रक्तं अपरिचित-जीवनानां नाम अर्पितवन्तः।

अस्मिन् रक्तदान-शिविरे राजकीय- चिकित्सालय- कोटद्वारस्य रक्तकोषसमूहात् अजयसिंह मेहरा, ज्योत्सना पोर्शन, प्रदीप रावतः, कपिल कुमारः; कुमारी गीता; गिरिराजसिंहः (समूहसंरक्षकः); परिवहनविभागात् सहायक- सम्भागीय- परिवहन- अधिकारी (प्रवर्तन) शशि दुबे, परिवहन- कर- अधिकारी जयन्त वशिष्ठः, परिवहन- उपनिरीक्षकौ सुशीलकुमारः, विजेन्द्र प्रसादः, अन्ये प्रवर्तनकर्मिणः सुमित कुमारः, कुन्दन सिंहः, देवेश भट्टः, अंकित कुमारः, सुमित गुसैं, राकेश कुनियालः, प्रिया, आधारशिलासमूहस्य च स्वयंसेवकाः याशिका जख्वालः, शिवम नेगी, इन्दू नौटियालः, शंकर बहादुरः सर्वे पूर्णं योगदानं दत्तवन्तः। स्वकर्मणा ते दर्शितवन्तः। सेवायै न वयः आवश्यकं, केवलं महान् उद्देश्यः एव पर्याप्तः। यातायात- सुरक्षा- सप्ताहस्य अन्तर्गतं आयोजिते अस्मिन् रक्तदान-नेत्रपरीक्षणशिविरे एतत् प्रतिपादितम्- वास्तविकः अर्थः केवलं दुर्घटनानां निरोधनं न, अपि तु परस्पर-जीवनस्य मूल्यबोधः एव। "३५ नेत्रपरीक्षाः, २३ रक्त-कोषसंख्याः। एतत् केवलं सङ्ख्याः न, अपि तु रक्षित-जीवनानाम् आशाः।" इति।

# आरडीजी विषयक प्रकरणे मुख्यमन्त्री सुखविन्द्रसिंहसुक्खुवर्यस्य भाजपां प्रति प्रत्युत्तरम्- "प्रधानमन्त्रिणः समीपे समयं याचताम्, वयं सह गन्तुं सिद्धाः"

हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्द्रसिंहसुक्खुः भारतीयजनतापक्षं प्रति तीव्रं प्रत्युत्तरं दत्तवान्। मुख्यमन्त्री अवदत् यत् भाजपा-विधायकदलम् राज्यपालं समभिगच्छति चेत्, तत्र हिमाचलप्रदेशस्य हितविषये एव वाक्यं कर्तव्यम्। आरडीजी (Revenue Deficit Grant) हानिविषये राज्यपालस्य समक्षं चर्चा कर्तव्या इति सः अवोचत्।मुख्यमन्त्री अवदत् यत् विधायक- क्षेत्र- विकास- निधिः तदा एव विमोच्यते, यदा राज्यस्य आर्थिकस्थितिः सुदृढा भविष्यति। सः आरोपं कृतवान् यत् केचन भाजपानेतारः देहलीं गत्वा हिमाचलप्रदेश- सर्वकारस्य सहाय्यं निरोधयन्ति।मुख्यमन्त्री सुखविन्द्रसिंहसुक्खुः अवदत् यत् रेवेन्यू- डेफिसिट- ग्रान्ट इत्यस्य निरोधेन हिमाचलप्रदेशस्य आर्थिकस्थितिः अत्यन्तं दुष्करा अभवत्। सः भारतीयजनतापक्षस्य नेतॄन् आहूतवान् यत् ते सह दिल्लीं गत्वा हिमाचलप्रदेशस्य हितार्थं प्रयासं कुर्वन्तु। सः अवदत् यत् स्वातन्त्र्योत्तरकाले प्रथमवारं हिमाचलप्रदेशस्य आरडीजी निरुद्धा जाता। विशेषसत्रे सर्वकार जनतायै अवगतं करिष्यति यत् गतदशवर्षेषु केन्द्रसर्वकारः हिमाचलप्रदेशाय किं किम् अददात्। सः भाजपा-विधायकानामपि सहयोगं याचितवान्।मुख्यमन्त्री अवदत् यत् भाजपा-विधायकाः तथ्येषु न वदन्ति, अपि तु दुष्प्रचारं कुर्वन्ति। सः स्पष्टं कृतवान् यत् विधायकक्षेत्र- विकासनिधिः केवलं कांग्रेस- विधायकानां न, अपि तु भाजपा- विधायकानामपि न प्राप्यते। प्रत्युत्तरं दत्त्वा सः अवदत् यत् सर्वकार दृढतया स्वपक्षं स्थापितवती। "एक फरवरी " दिनं हिमाचलप्रदेशाय कृष्णदिनः आसीत् इति सः अवोचत्। अधुना सः आहूतवान् यत् भाजपानेतारः सह आगच्छन्तु तथा प्रधानमन्त्रिणः समक्षं स्वपक्षं स्थापयन्तु।

# "हिरकणी" – भारतीयनार्याः साहसिकशक्तेः सशक्तं प्रकटीकरणम् – ह.भ.प. मृण्मयी कुलकर्णी




**हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे, नागपुरम्।** कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य, रामटेकस्थिते चन्द्रशाला-प्राङ्गणे, माघमासस्य चन्द्रिकायाः साक्षित्वे कीर्तनमहोत्सवः २०२६ इत्यस्य भव्यः उत्साहपूर्णश्च शुभारम्भः दिनाङ्के ५ फरवरी २०२६ तमे सम्पन्नः। अस्य महोत्सवस्य कल्पनाशीला संयोजिका प्रो. कलापिनी अगस्ती महाभागया स्वीयेन सौन्दर्यबोधेन सृजनात्मकेन च शैलीन कार्यक्रमस्य उत्कृष्टा सिद्धता कृता।मञ्चे प्रमुखातिथिरूपेण ह.भ.प. हरिहर चाफले महाराज महोदयः, अध्यक्षरूपेण वारङ्गा-परिसर-सञ्चालकः प्रो. कृष्णकुमार पाण्डेय महोदयः, विशेषोपस्थितिरूपेण मा. कुलसचिवः डॉ. रोशन अलोने महोदयः, निमन्त्रकरूपेण प्रो. हरेकृष्ण अगस्ती तथा प्रो. कीर्ति सदार महाभागौ, तथा संयोजिका प्रो. कलापिनी अगस्ती महाभागा उपस्थिताः आसन्।प्रथमदिने सरस्वतीदेव्याः तथा श्रीरामचन्द्र–सीतामातृणां पूजया हरिपाठेन च कीर्तनस्य शुभारम्भः अभवत्।प्रथमदिने नागपुरनगरस्य प्रसिद्धा कीर्तनकारा सौ. मृण्मयी भाटवडेकर–कुलकर्णी महाभागया "हिरकणी" इति विषये भावपूर्णं कीर्तनं प्रस्तुतम्।पूर्वरङ्गे तया तुकाराममहाराजस्य अभङ्गः — "पूर्वरंग स्वर्गींचे अमर इच्छितात़ि देव" — इत्यस्य माध्यमेन आख्यानस्य आरम्भः कृतः, तदनुरूपं च भारतभूमेः माहात्म्यं वर्णितम्।ततः उत्तररङ्गे "सारस्वतभूः वैदर्भी" इति विषयस्य अन्तर्गतं, श्रीरामेण अयोध्यागमनकाले सीतामातृ प्रति वर्णितस्य वैदर्भप्रदेशस्य महत्त्वं निरूपयित्वा, हिरकण्याः रूपेण मातुः वात्सल्यं, प्रेम, सन्तानविषयकां तड़पं, तेषां सुखार्थं कृतं निरन्तरं परिश्रमं च मार्मिकेन रसपूर्णेन आख्यानेन प्रस्तुतम्।सामान्या नारी यदा मातृरूपेण शक्त्यवतारं धारयति, तदा सा किं किं कर्तुं शक्नोति, संसारस्य सह कथं सङ्घर्षं करोति, किदृशं साहसं च प्रदर्शयति—इति रोमाञ्चकं वर्णनं श्रोतॄन् मन्त्रमुग्धान् अकरोत्।उत्स्फूर्तैः घोषैः, तालवाद्यनादैः, भक्तिरससंयोगेन च अलङ्कृतं तत् कीर्तनं सौ. मृण्मयी कुलकर्णी महाभागया अत्यन्तं प्रभावशालिन्या शैलीन प्रस्तुतं कृतम्, यत् उपस्थितैः श्रोतृभिः करतालनिनादेन महता प्रशंसितम्।अस्मिन् महोत्सवे रामटेकस्य सम्माननीयः ह.भ.प. हरिहर चाफले महाराज महोदयः प्रमुखातिथिरूपेण उपस्थितः आसीत्। रामटेकस्य विकासार्थं तेन कृतानां कार्याणां मार्गदर्शनस्य च हेतुना विश्वविद्यालयतः रामटेक-परिसर-सञ्चालकः प्रो. हरेकृष्ण अगस्ती, वारङ्गा-परिसर-सञ्चालकः प्रो. कृष्णकुमार पाण्डेय तथा मा. कुलसचिवः डॉ. रोशन अलोने महोदयः शुभहस्तैः तस्य सम्मानं कृतवन्तः।प्रस्तावनावक्तव्ये संयोजिका प्रो. कलापिनी अगस्ती महाभागया उक्तं यत् कीर्तनं ईश्वरभक्तेः साधनं माध्यमं च अस्ति। कालेन सह ईश्वरभक्त्या सह समाजप्रबोधनमपि कीर्तनस्य अङ्गं जातम्। श्रीरामचन्द्रस्य अस्यां पुण्यनगर्यां, रामटेकवासिनां साक्षित्वे, अस्य कीर्तनमहोत्सवस्य आयोजनं प्रभुश्रीरामस्य कृपा एव। "अस्माकं एषा रामसेवा स्वीकर्तव्यताम्"—इति सा प्रार्थितवती। सम्पूर्णं विश्वविद्यालयं कीर्तनरङ्गे निमग्नं अभवत्। सामूहिकाया आरत्याः सह प्रथमदिनस्य कीर्तनस्य समापनं जातम्। कार्यक्रमस्य सञ्चालने प्रा. राधा देशकर महाभागया कृतम्, आभारप्रदर्शनं च प्रो. हरेकृष्ण अगस्ती महोदयेन कृतम्।



# छिद्रघटस्य कथा

## (फूटे हुए घड़े की कहानी)

दूरे पर्वते कश्चन कृषकः निवसति स्म। तस्य ग्रामस्य नाम 'रामपुरम्' आसीत्। रामपुरग्रामे सर्वदा जलस्य महती समस्या आसीत्। जनाः दूरपर्वतेषु गत्वा नदीभ्यः निर्झरेभ्यः वा जलम् आनयन्ति स्म। यद्यपि प्रतिवर्षं सुवृष्टिः भवति स्म, तथापि ग्रामस्य उच्चैः ढलाने (नततले) स्थितत्वात् सर्वं जलं वहति स्म, तडागाः च शीघ्रमेव शुष्यन्ति स्म। सर्वे चिन्तिताः आसन् परन्तु कोऽपि किमपि कर्तुं न शक्नोति स्म।

**दुर्भिक्षं शामू च** एकस्मिन् वर्षे अतिन्यूनवृष्टिः अभवत्। क्षेत्राणि शुष्काणि अभवन्। पानार्थं जलं नासीत्। जनाः ग्रामं त्यक्त्वा गन्तुम् आरब्धवन्तः। ये अवशिष्टाः, ते कथञ्चित् पर्वतात् जलम् आनीय स्व-आवश्यकतां पूरयन्ति स्म। तस्मिन्नेव ग्रामे 'शामू' नाम कश्चन कृषकः वसति स्म। सः स्व-उपवनेन पशुभिः च सह अतीव स्नेहं करोति स्म। यदा अन्ये जनाः पशून् विक्रीयन्ते स्म, तदा शामूः पशुविक्रयणं स्पष्टतया अस्वीकृतवान्। तस्य भार्या अवदत्, "पश्यतु, यदि भवतः कारणात् पशवः जलं विना मृताः भवेयुः, तर्हि ईश्वरः अस्मान् कदापि न क्षमिष्यते।" परन्तु शामूः आत्मविश्वासपूर्णः आसीत्। सः प्रतिदिनं प्रातः पर्वतं गत्वा घटद्वये जलं पूरयित्वा आनयति स्म, पशुनां पिपासां च शमयति स्म।

**छिद्रघटस्य व्यथा** एकदा जलपूरणसमये अकस्मात् एकस्य घटस्य पाषाणेन सह संघर्षणम् अभवत्, येन तस्मिन् एकं छिद्रम् अभवत्। शामूः एतत् न ज्ञातवान्। सः घटद्वयं नीत्वा चलितवान्। मार्गे सः घटः अर्धरिक्तः अभवत्। गृहं प्राप्य शामूः छिद्रं दृष्टवान्, परन्तु किमपि विचिन्त्य सः तं न संस्कृतवान् (ठीक नहीं किया)। एवं बहुदिनानि यावत् चलति स्म—एकः घटः पूर्णः, अपरः च अर्धरिक्तः।

एकदा पूर्णघटः छिद्रघटम् उपहसन् अवदत्, "रे भ्रातः! किमिदं तव जीवनम्? पश्य, स्वामी एतावान् दूरं गत्वा परिश्रमेण जलम् आनयति, त्वं च अर्धरिक्तः आयासि। मां पश्य, अहं सर्वदा पूर्णः आगच्छामि!" इति उक्त्वा सः उच्चैः अहसत्। छिद्रघटः अतीव दुःखितः अभवत्।

### शामू-महोदयस्य समाधानम्

शामूः तं दुःखितं दृष्ट्वा पृष्टवान्, "किम् अभवत् भ्रातः? किमर्थं म्लानवदनः (उदास) असि?"घटः अवदत्, "स्वामिन्, मम जीवनेन कः लाभः? भवान् एतावान् परिश्रमं करोति, किन्तु अहं प्रतिवर्षं रिक्तः भवामि। भवतः हानिः भवति।"
शामूः मन्दं हसित्वा अवदत्, "अस्य उत्तरं श्वः प्रातः दास्यामि।"
प्रातःकाले शामूः पुनः चलितवान्। मार्गे सः घटम् अवदत्, "पश्य, अधः पश्य!"घटेन दृष्टं यत् यस्मिन् पार्श्वे सः लम्बते स्म, तस्मिन् पार्श्वे मार्गे हरितं घासं, सुन्दराणि पुष्पाणि, भ्रमराः, तित्तयः च आसन्। अपरस्मिन् पार्श्वे तु केवलं शुष्का भूमिः आसीत्। शामूः अवदत्, "मया ज्ञातं यत् जलस्य आवश्यकता न केवलं मह्यं, अपितु सर्वेभ्यः अस्ति। तव छिद्रतः यत् जलं स्रवति स्म, तेन एषा हरितिमा उत्पन्ना। पश्य, तव कारणेन इयं प्रकृतिः कीदृशी सुन्दरी दृश्यते!"
एतच्छ्रुत्वा छिद्रघटः आनन्दितः अभवत्। पूर्णघटः अपि स्वकीयां दोषं ज्ञात्वा क्षमां प्रार्थितवान्।
शिक्षाः अस्माकं दोषाः अपि कदाचित् अन्येषां कृते वरदानं भवितुं शक्नुवन्ति।

# "लौकिकन्यायकोशः"
## "रामठकरण्डन्यायः"

करण्डके स्थापितस्य रामठस्य एतावान् प्रभावः भवति यत् तस्मिन् यावत्कालपर्यन्तं तिष्ठति तावत् करण्डकं सुगन्धयति पश्चात् अपनीयते चेदपि सुगन्धः करण्डके भवति एव। एवं सज्जनाः यावत्कालपर्यन्तं सह भवन्ति तावत् स्वसंगत्या अन्येषां जीवनं रञ्जयन्ति कालान्तरे गच्छन्ति चेदपि स्वसङ्गतेः सुगन्धं तथैव स्मरणरूपेण त्यजन्ति इति भावः।

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। श्रूयताम्। लोहग-याने केनचित् आरक्षकेण विना चीटिकाम् आरक्षिते स्थाने उपविष्टः। "वयं निःशुल्कं भ्रमामः" इति तेन उद्धतम् उक्तम्।
**नन्दिनी-** एतत् तु अनुचितं कृतम्। अपरा वार्ता – एकेन दम्पत्या आडम्बरपूर्णः विवाहः न कृतः। ताभ्यां स्वधनेन नूतनं गृहं क्रीतम्। तत्रैव विवाहः सम्पन्नः।
**काव्या-** अत्युत्तमः निर्णयः स्वीकृतः ताभ्याम्। अन्यत् शृणु– कयाचित् महिलया 'द्विचक्रिका-सेवा' माध्यमेन यात्रिकस्य स्थाने निगूढ-वस्तु प्रेषितम्। चालकः चकितः जातः।
**नन्दिनी-** विचित्रः उपायः खलु! अन्तिमा वार्ता – "धनेन सुखं न लभ्यते" इति वचनस्य उपरि इलान-मस्क-महोदयेन कटाक्षः कृतः। "पूर्वं मह्यं धनं दीयताम्" इति तेन भणितम्।



तृतीयपृष्ठस्य शेषं...

## राष्ट्रमार्ग-३०५ (NH-305) इत्यस्य स्थितिः

अन्यतः, चतुष्पाद-परिमित-हिमेन अवरुद्धं राष्ट्रमार्गं- ३०५ सुचारुं कर्तुं राष्ट्रिय-राजमार्ग- प्राधिकरणेन (NH) केवलं एकं 'जेसीबी' यन्त्रं (JCB) युक्तम् अस्ति। अस्य मन्द-गतेः कारणेन 'बाह्य सराज' क्षेत्रस्य ६९ पञ्चायतानां जनाः पीडिताः सन्ति। जनाः पञ्च-किलोमीटर-पर्यन्तं पादचारीरूपेण (On foot) गन्तुं विवशाः सन्ति। शनिवासरे अपि प्रायः ५० जनाः दर्रा-क्षेत्रं पादाभ्याम् लंघितवन्तः। स्थानीयजनाः आग्रहं कृतवन्तः यत् बंजार-पक्षतः अधिकानि यन्त्राणि नियोजितव्यानि येन मार्गः शीघ्रं उद्घाटितः भवेत्।

# आः कियत्कामाः सन्ति मे हृदये शोणिके

**(Sanskrit Version Of Hindi Film Song -**
## कितने अरमान जागे तेरे वास्ते शोणिये



आः कियत्कामाः कामाः ..
कामाः ..कामाः .. कामाः ..
सन्ति मे ही हृदये,शोणिके
आः कियत्कामाः कामाः ..
कामाः ..कामाः .. कामाः ..
सन्ति मे ही हृदये,शोणिके
आः कियत्कामाः कामाः ..
कामाः ..कामाः .. कामाः ..
सन्ति मे ही हृदये,शोणिके
आः कियत्कामाः कामाः ..
कामाः ..कामाः .. कामाः ..
सन्ति मे ही हृदये,शोणिके
All day,all night,
मां ते स्मृतिः ताडयति
हाय् हाय् स्मृतिः ताडयति
हाय् स्मृतिः ताडयते,ते हि
हाय् हाय् स्मृतिः ताडयति
हृत्कं शृणु,हृत्कं ज्ञात्वा,
हृत्कं कुरु गौरी
हाय् हाय् स्मृतिः ताडयति,
मां ते स्मृतिः ताडयति
स्मृतिः ताडयति,ते हि,
स्मृतिः ताडयति ...
All day,all night,
मां ते स्मृतिः ताडयति

हाय् हाय् स्मृतिः ताडयति
हाय् स्मृतिः ताडयते,ते हि
हाय् हाय् स्मृतिः ताडयति
हृत्कं शृणु,हृत्कं ज्ञात्वा,
हृत्कं कुरु गौरी
हाय् हाय् स्मृतिः ताडयति,
मां ते स्मृतिः ताडयति
स्मृतिः ताडयति,ते हि,
स्मृतिः ताडयति ---- (०१)
किं नु मे हृदयं त्वात्के
प्रेम्ण्यस्त्येकान्तम्
व्याकुले हे पलं पलं
भो दंशं नु भुक्तम्
किं नु मे हृदयं त्वात्के
प्रेम्ण्यस्त्येकान्तम्
व्याकुले हे पलं पलं
भो दंशं नु भुक्तम्
इत्वा कदा न याहि
मे ही जीवनेषु एहि
मे हि जीवनेषु एहि,एहि रे
आः कियत्कामाः कामाः ....
सन्ति मे ही हृदये,शोणिके
All day,all night,
मां ते स्मृतिः ताडयति
हाय् हाय् स्मृतिः ताडयति

हाय् स्मृतिः ताडयते,ते हि
हाय् हाय् स्मृतिः ताडयति
हृत्कं शृणु,हृत्कं ज्ञात्वा,हृत्कं कुरु गौरी
हाय् हाय् स्मृतिः ताडयति,
मां ते स्मृतिः ताडयति
स्मृतिः ताडयति,ते हि,
स्मृतिः ताडयति ---- (०२)
प्रेम्णि तेऽहं प्रेयसि मे,क्षणक्षणं पतामि
वीक्ष्य त्वाऽहं प्रेम्णा तावत् अहन्नु रजामि
प्रेम्णि तेऽहं प्रेयसि मे,क्षणक्षणं पतामि
वीक्ष्य त्वाऽहं प्रेम्णा तावत् अहन्नु रजामि
तव स्मिताहास्यं,मे खलु जीविताशं
मे खलु जीविताशं प्राशं रे ---
आः कियत्कामाः कामाः ..
कामाः ..कामाः .. कामाः ..
सन्ति मे ही हृदये,शोणिके
आः कियत्कामाः कामाः ..
कामाः ..कामाः .. कामाः ..
सन्ति मे ही हृदये,शोणिके
आः कियत्कामाः कामाः ..
कामाः ..कामाः .. कामाः ..

सन्ति मे ही हृदये,शोणिके
आः कियत्कामाः कामाः ..
कामाः ..कामाः .. कामाः ..
सन्ति मे ही हृदये,शोणिके
All day,all night,
मां ते स्मृतिः ताडयति
हाय् हाय् स्मृतिः ताडयति
हाय् स्मृतिः ताडयते,ते हि
हाय् हाय् स्मृतिः ताडयति
हृत्कं शृणु,हृत्कं ज्ञात्वा,
हृत्कं कुरु गौरी
हाय् हाय् स्मृतिः ताडयति,
मां ते स्मृतिः ताडयति
स्मृतिः ताडयति,ते हि,
स्मृतिः ताडयति ...
आः कियत्कामाः कामाः ..
कामाः ..कामाः .. कामाः ..
सन्ति मे ही हृदये,शोणिके ---- (०३)

**रचयिता -**
**डा.रुरुकुमारमहापात्रः(अध्यापकः)**
**राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः**